वेदान्त संस्कृत संपूर्ण

क्र.नं. १०२

# चार्वाकादिज्ञानमतविवरणं

४५४ | वे. ५८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥ श्रीः ॥

यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीम् ॥
स पारिषत्क्रतुभिर्मन्दसानो मरुत्वान्नो भवत्विन्द्र ऊती ॥१४॥

ऋ० अ० १ अ० ७ मं० १ सू० १००

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीः

हिरण्यगर्भोनाम देवोग्रे सर्वस्मात् पूर्वं समवर्तत स्व
२ ममेवाविर्भूवत्। जातः प्रादुर्भूतः सन् भूतस्य स्वस्मात् सं
भूतस्य विश्वस्य एकः असा धारणः पतिः पालक आसीत्।
स देवः पृथिवीं उत अपि इमां द्यां अंतरिक्षं स्वर्गं चाद्यो
शब्दस्योक्तो मर्यार्थ कत्वेन वेदनिघंटौ लौकिककोशादौ चाभि
धानात् दाधार धृतवान्। अतः कारणात् कस्मै देवाय हविषा
विधेम। क इत्यदन्तं प्रातिपदिकं प्रजापतिवाचकम्। क्रि
यार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी हविषेति द्वि
तीया बहुवचनम् सुपां सुलुगिति विभक्तेरालादेशः। एवं
च प्रजापतिं देवमनुकूलयितुं हवींषि विधेम कुर्म इ-
त्यर्थः॥ आर्यविद्यासुधाकरः। प्रथम प्रकाशः॥

वेदमेव सदाभ्यस्येत् तपस्तप्स्यन् द्विजोत्तमः। वेदाभ्या-
सोहि विप्रस्य तपः परमिहोच्यते॥ योनधीत्य द्विजो वेदा
नन्यत्र कुरुते श्रमम्॥ स जीवन्नेव शूद्रत्वमाशु गच्छति सान्व
य इति मनुः। अन्यत्रापि जन्मना जायते शूद्रः संस्काराद्द्विज
उच्यते। वेदाभ्यासाद्भवे द्विप्रो ब्रह्म जानाति ब्राह्मण इति। ब्रा-
ह्मण कुले जन्मोत्पत्तिमात्रेण शूद्रः शूद्रकल्पो जायते। असं
स्कृतस्य शौचाचाराद्यभावादिति भावः। गौर्वाहीक इत्या
दाविवात्र वाक्ये गौण्यावृत्या शूद्र शब्दप्रयोगः। यद्वा अ
शूद्र इति च्छेदः। एवमपि पूर्वोक्त एवार्थः फलति। नन्विव
पुक्तमन्य सदृशाधिकरणे लोके तथाह्यर्थगतिरितिन्या
यात्॥

ओदनमुदब्रुवते परमेष्ठी वा एषः। यदोदनः।
परमामेवेनं श्रियं गमयति॥ इति कृष्णयजुः सं.

(3)

कांड १ प्रपाठक ८ अनुवाक १२॥ अस्यार्थः। ओदनमुदब्रुवंते परमेष्ठी वा एषः। यदोदनः। ओदनं उद्ब्रुवते पणत्वेन प्रतिजानन्ति। यत् यतः एष ओदनः परमेष्ठी प्रजा स्रष्टा। अन्नाद्वैत इत्यादि प्रकारेणेत्याशयः। एनं प्रतिज्ञातारं परमां श्रियं गमयति प्रापयतीत्यर्थः। अयमत्राभिसंधिः जये पराजये वा जितो वा हारितो वा ओदनो भवेदित्युभयथापि समुचितोयमोदनपण इति॥ आ॰बि॰ प्र॰२॥

आ॰बि॰ प्र॰२ पृ॰ ६६ प्रजापतिर्मंतान सृजत्॥

अग्निहोत्रं चाग्निष्टोमं चेत्यादिरूपया श्रुत्या अग्निहोत्रमधियज्ञशब्देन व्यवहृतं तत्र यज्ञ प्रयोगो भाक्त इति मति भाति। आश्रावयेत्यादिमंत्रपंचकस्य यत्र कर्मणि विनियोगः सकर्मविशेषो यज्ञ शब्दस्य मुख्यो विषय इति श्रौत तात्पर्यस्यावगम्यमानत्वात्। तथाच कृष्ण यजु॰ कां॰ १ प्रपा॰ ६ यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेद प्रति यज्ञेन तिष्ठति इति॥ आश्रावयेति चतुरक्षरः। अस्तु श्रौषडिति चतुरक्षरः। ~~यज~~ ~~द्व्यक्षरः~~। यज इति द्व्यक्षरः। ये यजामहे इति पंचाक्षरः। वौषट् इति द्व्यक्षरः। अस्य मंत्रस्य संकलनया सप्तदशाक्षराणि संतीत्यत इदं मंत्रपंचकं सप्तदशाक्षरं प्रजापतिदृष्टत्वात् प्रजापतिसंज्ञकं यज्ञमन्वायत्तं सकलयज्ञ प्रयत्नवर्तमानं यो वेद सपुरुषो यज्ञेन प्रतिष्ठितो भवति न यज्ञात् प्रच्युतो भवतीति तदर्थः। यथान्वेतन्मंत्र पंचकं यज्ञक्रियासु विनियुज्यते तथात्र संक्षेपत उदाह्रियते।

पद (margin)

पंचक (margin)

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

देवामासादितानि ध्रुवाज्यचरुपुरोडाशादीनि हव
नीयद्रव्याणि अध्वर्युः स्रुवगृहीतेनाज्येनाभिघार्य
ध्रुवाज्यात् त्रिवारं स्रुवगृहीतेनाज्येन स्रुचं पूरयित्वा
दक्षिणहस्तेन धारयन् वामहस्तमुरसि कृत्वा आहवनी
याभिमुखः सविनयं तिष्ठन् सन् होतारं प्रेष्यति'
अग्नयेऽनुब्रूहीति। अग्निमाह्वयेति प्रेषवाक्या
र्थः। ततो होता। 'अग्निर्वृत्राणि जंघनत्' इत्यादिपु
रोवाक्यासंज्ञकयर्चा अग्निं स्तुत्वा आह्वयेत। ततो
ध्वर्युराग्नीध्रं प्रैष्यति 'आश्रावय' इति इमान्सु
पकल्पितानि हवनीयद्रव्याणि देवेभ्य आश्रावये
ति प्रैषवाक्यार्थः। तत आग्नीध्रः स्फ्यहस्तस्ति
ष्ठन् पठति 'अस्तु श्रौषट्' इति। अस्तु इत्यनेनाध्व
र्युकृतप्रैषाङ्गीकारः। श्रौषडित्यस्य भो देवाः
यं शृणुध्वमिति तदर्थः। पुनरध्वर्युर्होतारं प्रेष्यति
यज इति। याज्यामंत्रं पठेति तदर्थः। ततो होता 'ये यजा
महे। अग्निं जुषाणोऽग्निराज्यस्य वेतु वौषट्' इति पठति।
ये वयमग्निं यजामहे तानस्मान् प्रतिजुषाणः प्रसन्नोऽ
ग्निराज्यस्य वेतु भक्षयतु। वौषडित्यस्य इदं हविर्दी
यत इत्यर्थः। एतन्मंत्रान्ते अध्वर्युराहुतिमग्नौ प्रक्षिपति।
ततो यजमानोऽग्नय इदमिति यथायथं त्यागवाक्यमुच्चा
रयति इति। स्मृतिरपि चतुर्भिश्चेति॥ तथा श्रुत्यंतरम्।
ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति श
क्वरीषु॥ ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि
मिमीत उ त्वः॥ ऋ० अ० ८ अ० २ अस्यार्थः।

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)



एव इत्यन्यार्थकं सर्वनाम। एवः अन्यो होता ऋत्विग्विशेषः पुपुष्वान् पुष्टिकर्ता ऋचां पोषमास्ते तत्र त्वत्राय. ग्रामम पठितानामृङ्कानामिन्द्रिमैत्रैरिदं शास्त्रं संपद्यत इत्येव रूपां पुष्टिं संपादयति। अन्य उद्गातृनामकऋत्विक् शक्वरीषु तन्नामकमृङ्मंत्रेषु गायत्रं सामगायति। अन्यो ब्रह्मा ऋत्विक् जातविद्यां जात प्रारब्धे कर्मणि विद्यां संदेहनिवर्तिकां बुद्धिं वदति। अन्योऽध्वर्युनामकऋत्विक् यज्ञस्य मात्रां स्वरूपं विमिमीते निर्मीतीत्यर्थः॥ ननु श्रौतयज्ञानां त्रयी साध्यत्वाद्यज्ञकर्मानुष्ठानं मिलितैस्त्रिभिर्वेदैर्भवति। तत्र ऋग्वेदेन हौत्रं यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं कर्म क्रियते परं ब्रह्मत्वं केन वेदेन कार्यमिति चेदत्रोत्तरितमैतरेयब्रा• पं• ५ ॥ यदृच्येव हौत्रं क्रियते यजुषा आध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात्॥ इति त्रय्या विद्ययाऽवेदत्रयेण यजमानशाखया वेत्याहुः॥

---

श्राद्धभोजनीयब्राह्मणसंख्यामाह मनुः। द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि न प्रसज्जेत विस्तरे इति। दैवे दैवश्राद्धे विश्वेषां देवानां स्थाने इति यावत् द्वौ। पितृकार्ये पितृ पितामह प्रपितामहानां स्थाने त्रीन्। यद्वा दैवे एकं पित्रादित्रिके चैकं ब्राह्मणं भोजयेत्। सुसमृद्धोऽपि यजमानो नोक्ताधिकब्राह्मणभोजने प्रवर्तेतेत्यर्थः। अयं भावः। यदा देवस्थाने द्वौ विप्रौ तदा पित्रादित्रिकस्थाने पि त्रय एव निमंत्रणीयाः। यदा वा देवस्थाने एकस्तदा पित्रादिस्थाने

प्येक एव। एवमनयैव दिशा बहुपित्रादिदेवतानेषु द-
र्शमहालयादिश्राद्धेष्वपि प्रातित्रिकं त्रय एको वा तथा-
नेकत्रिकादिस्थाने प्येक इति वा यथासंभवं द्रष्टव्यमि-
ति। तथा चोक्तमाश्वलायनगृह्ये "न त्वेवैकं सर्वेषां
पिंडैर्व्याख्यातं काममनाद्ये" इति। पितृपितामहादीनां
सर्वेषामुद्देशेन यथा नैकं पिंडं निर्वपेत् तथैकं ब्राह्मण-
मपि न भोजयेत्। पक्षान्तरं दर्शयति। काममनाद्ये इति।
आद्यं न भवतीत्यनाद्यं बहुपित्रादिदेवताकश्राद्धाना-
माद्यं सपिंडनं तद्भिन्नं सर्वं दर्शमहालयादिश्राद्धमना-
द्यं तत्र कामं यथेच्छं विप्रमेकमपि भोजयेदिति तदर्थः।
विस्तारप्रतिषेधं सकारणमप्याह मनुः। सत्क्रियां दे-
शकालौ च शौचं ब्राह्मणसंपदः। पंचैतान् विस्तरो
हन्ति तस्मान्नेहेत विस्तरमिति॥ अस्यार्थः। सत्क्रि-
यां ब्राह्मणपूजाम्। देशं दक्षिणाप्रवणादिरूपम्। कालमपरा-
ह्णम्। शौचं पावित्र्यं श्राद्धकर्तृभोक्तृब्राह्मणगतं पाच-
कादित्रैष्यवर्गनिष्ठं च। गुणवद्ब्राह्मणलाभरूपा ब्राह्म-
णसंपदः। श्राद्धे प्रशस्तब्राह्मणानाह मनुः। श्रोत्रि-
यायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय वि-
प्राय तस्मै दत्तं महाफलम्॥ छन्दोमात्राध्यायी श्रोत्रि-
यस्तस्मै देवपित्र्यान्नानि यत्नतो देयानि। अर्हत्तमाय
श्रुताचाराभिजनादिभिः पूज्यतमाय इत्यर्थः। एकैकम-
पि विद्वांसं दैवे पित्र्ये च भोजयेत् पुष्कलं फलमाप्नोति
नामंत्रज्ञान् बहूनपि। इति॥ वसून् वदंति तु पितॄन् रु-
द्रांश्चैव पितामहान्। प्रपितामहांस्तथादित्यान् श्रुति-
रेषा सनातनी॥ पितॄन् पितृमातृमातामहपितृव्या-
दीन्।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

पिता महान् पिता मह पिता मही प्रमाता महान्।२।
प्र पितामहान् प्रपितामहः प्रपिता मही वृद्ध प्र माताम
हान् इति ३॥

श्रुतिस्मृत्युदित सद्धर्म मनुष्ठितां गृहमेधिनां हिता
हित मुपदिशति मनुः। नहीदृश मनायुष्यं लोके किंचन
विद्यते। यादृशं पुरुषस्येह परदारोपसेवनम्। स्त्रि
या अपि परपुरुषोपसेवनं हानिकरमिति तुल्यन्यायेन
द्रष्टव्यम्।१। नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः।
आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम्॥२॥ सत्यं
ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियं च ना-
नृतं ब्रूयादेष धर्मः सनातनः॥३। यथा दृष्टश्रुतं, यथादृ
ष्टश्रुतमप्यप्रियं पुत्रस्ते मृत इत्यादि सत्यां गतौ स्वयं
न ब्रूयात्॥३॥ वाच्यर्था नियताः सर्वे वाङ्मूला वाग्
विनिःसृता। तां तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः
॥४। तो वाचं यस्तेनयेत स्वार्थविरहितां कुर्यात् अन्यतं
वदेदिति यावत्॥५॥ मंगलाचारयुक्तः स्यात् प्रयतात्मा
जितेंद्रियः। जपेच्च जुहुयाच्चैव नित्यमग्निमतंद्रितः। उत्तमै
रुत्तमैर्नित्यं संबंधानाचरेत् सह। निनीषुः कुलमुत्कर्षमध
मानधमांस्त्यजेत्॥६॥

चार्वाकमतम्। न स्वर्गो नापवर्गो वा नैवात्मा पार
लौकिकः। नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥
१॥ अग्निहोत्रं त्रयो वेदास्त्रिदंडं भस्मगुंठनम्। प्रज्ञा
पौरुषहीनानां जीविकेति बृहस्पतिः॥२॥ पशुश्चेन्निह-
तः स्वर्गं ज्योतिष्टोमे गमिष्यति। स्वपिता यजमानेन
तत्र कस्मान्न हन्यते॥३॥ मृतानामपि जन्तूनां श्राद्धं चे
त्तृप्तिकारणम्। गच्छतामिह जंतूनां व्यर्थं पाथेयकल्प
ना॥४॥ यदि गच्छेत्परं लोकं देहादेष विनिर्गतः। कस्मा-

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

भूयो न चायाति बंधुस्नेहसमाकुलः॥९॥ ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह। मृतानां प्रेतकार्याणि नत्वन्यद्विद्यते क्वचिदिति। लोकाः प्रायेण दृष्टसुखानुरागिण एव सन्ति। ते हि नीतिकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकसुखमपह्नुवानाश्चार्वाकमतानुयायिनः प्रायशो भवन्ति। अत एवार्थकामानुगैर्लौकिकैरायतं विस्तृतं लोकायतमित्यन्वर्थमस्य मतस्यापरं नामधेयमिति दिक्। इति चार्वाकमतदर्शनम्॥

धर्ममीमांसा॥ चोदनागम्यत्वे सति अर्थत्वमिति धर्मस्य लक्षणं संपद्यते। अर्थत्वमात्रं घटादीनामप्यस्तीति तत्रातिव्याप्तिवारणाय सत्यन्तं दलम्। तावन्मात्रोक्तौ श्येनेनाभिचरन् यजेतेति विधिगम्येऽप्यनर्थफलत्वेनानर्थरूपे श्येनाद्यभिचारकर्मण्यतिव्याप्तिः स्यात् तद्वारणायार्थत्वमित्युक्तम्। यद्यपि श्येनयागस्य शत्रुवधः फलं कथ्यते न तु नरकस्तथापि तत्फलभूतस्य प्राणिवधस्य नरकलक्षणानर्थहेतुत्वात्। प्राणिवधफलकं श्येनयागाद्यभिचारकर्माप्यनर्थात्मकमेव। न चैवमग्नीषोमीयपशुहिंसाया अपि वधत्वेन नरकहेतुत्वं स्यादिति शंकनीयम्। तस्याः क्रत्वङ्गत्वेन परतंत्रत्वात् क्रतुफलस्वर्गव्यतिरेकेण फलान्तरजनने स्वातंत्र्याभावाच्च॥ एवंच गम्ये धर्मे गमकं विधिवाक्यं साक्षादेव प्रमाणम्॥

विवाहप्रकरणम्- मनुसंहिता अध्या. ९ श्लो. ४७ सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सतां सकृदिति॥ पित्रादिधनविभागोंशः सभ्रातृणां धर्मतः कृतः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सकृदेव भवति न पुनरन्यथा क्रियेते। तथा पित्रादिभिः सकृदेक
स्मै दत्ता कन्या न पुनरन्यस्मै दीयते। एवं चान्येन पूर्वमन्यस्मै
दत्तायां पश्चात् पित्रादिभ्यः प्राप्तायामपि जनितमपत्यं
न बीजिनो भवतीत्येतदर्थमस्योपन्यासः। तथा कन्या
तोऽन्यस्मिन्नपि गवादिद्रव्ये सकृदेव ददातीत्याह न पुन
स्तदन्यस्मै दीयते। त्रीण्येतानि सतां साधूनां धर्म्यपथानु
वर्तिनां सकृद्भवन्तीति कुल्लूकभट्टो व्याचख्यौ॥

कात्यायनः। स तु यद्यन्यजातीयः क्लीबः पतित एव
वा। विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा। ऊढापि
देया सान्यस्मै सहाभरणभूषणेति। अत्रोढापीत्यपि
शब्दः कैमुतिकन्यायेन वाग्दत्ताया एवान्यस्मै दानमाच
ष्टे न तूढायाः। तथात्वे सगोत्रोढाया अपि पुनर्विवाहः
प्रसज्येत। तथात्वे सति च भोगात् तां परित्यज्य पालये
ज्जननीमिवेति विरुध्येत॥ सूक्ष्मो धर्मो महाराज ना
स्य विद्मो वयं गतिम्। इति द्रौपदीविवाहप्रकरणस्थस्य युधिष्ठि
र वाक्यस्य व्याख्यावसरे नैकस्या तस्मादेकस्य बह्व्यो जाया
भवन्ति नैकस्यै बहवः सह पतय इति श्रुत्या सहेति युगपद्ब
हुपतित्वनिषेधो न तु समयभेदेनेति नीलकण्ठभट्टेनोक्तम् तस्य
तु नह्येकस्याः स्त्रियः समयभेदेन बहवः पतयः कर्तव्या इत्येवं
रूप विधिकल्पनायां तात्पर्यं किन्तु समयभेदेन बहुपतित्वनिषेधा
भाव एव। तथा च शास्त्रीय प्रातिस्विक निषेधानुपलम्भमात्रेण -
संदिग्धानुष्ठेयत्वलक्षणं स्वद्धर्मत्वं न लोकविद्विष्टस्य कर्मणः सि
ध्यतीति तदाशयः। उदाहृत नीलकण्ठीय व्याख्यानस्य विधवावि-
वाहव्यावृत्तिसमानतात्पर्यकत्वे तु प्रवृत्त विषये धर्मस्य विधिबोधि-
तत्वेनासंदिग्धत्वाद् बोधत्वलक्षण सूक्ष्मत्वस्य भंगापत्त्या सू
क्ष्मो धर्मो महाराज इति मूलग्रन्थोक्तार्थ प्रतिकूलता वापद्येत, त-
स्मात् व्यर्थे कमपि विशालं गृहक्षेत्रादिकं वृक्षादिकं वा वस्तु

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

युगपदनेकेभ्योऽपि दातुं शक्यते तथा एकस्या अपि कन्याया युगपद्बहुपुरुषेभ्यो दानप्रसक्तौ तन्निषेधा[redacted]य प्रवृत्ता मा नैकस्यै बहवः सहपतय इति श्रुत्याः क्रमिकबहुपतिसत्वकल्पकत्वं नास्त्येवेति युक्तम्। एवं च सति " यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मा[redacted]देको द्वे जाये विन्देत यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विंदेत इति श्रुत्यंतरस्यापि संवादः संपद्यते, न ह्येकस्मिन् क्रतौ यूपस्तंभे परिवीतायाः रशनायाः समर्थभेदेनाप्यनुष्ठीयमाने द्वितीयस्मिन् क्रतौ यूपस्तंभे परिव्ययनं संभवति, तस्या रशनायाः प्रथमभूतक्रतूच्छिष्टत्वेनामेध्यत्वादुत्तरे क्रतुकर्मण्यनर्हत्वात्। तस्मादेकवारं यथोक्तविवाहविधिना कस्मैचिदेकस्मै प्रदत्ताया नार्याः सत्यपि पत्युर्नाशादौ पुनरन्यस्मै प्रदानं न धर्म्यं भवति। तस्याः कन्यात्वाभावेन दानयोग्यत्वाभावादिति तत्त्वम्। एतेन विधवाविवाहो न वेदविरुद्ध इति केषांचिदाधुनिकानां युक्तिः परास्ता वेदितव्या इति भट्टयज्ञेश्वरशर्मा॥

---

मीमांसा जैमिनीया। प्राशस्त्यनिन्दान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः। स च त्रिविधः। गुणवादोऽनुवादो भूतार्थवादश्चेति भेदात्। तत्र प्रमाणान्तरविरुद्धार्थबोधकं वाक्यं गुणवादः। यथा आदित्यो यूप इत्यादिः। अत्र हि प्रत्यक्षविरुद्धं यूपादावादित्यत्वादि। तस्मादादित्यादिवद्यागनिर्वाहकत्वरूपो गुण आदित्यादिशब्दैरुपलक्ष्यत इति तस्य गुणवादत्वम्। प्रमाणांतरसिद्धार्थबोधकोऽनुवादः। यथा "वायुर्वै क्षेपिष्ठा देवता। वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति"। इत्यादिः। अत्र हि क्षिप्रगामी वायुरित्ययमर्थो लोकानुभवसिद्धः। स वायुः स्वोचितेन भागेन तोषितः सन्नैश्वर्यं प्रयच्छतीत्यर्थस्तु वायव्यं श्वेतमालभेत भूतिकाम इति विधिवाक्येनैव सिद्धः। तस्मादस्यानुवादत्वम्। अविरुद्धाज्ञातार्थबोधको भूतार्थवादः। इन्द्रो वृत्राय वज्रमुदयच्छदित्यादिः। अत्र भारतरामायणादाविव वृत्तान्तः कश्चिदे

विरुद्धः प्रमाणान्तरेणाप्यसम्भव प्रतीयते न खलु द्वेष्यं किंचित् तस्मायं भूतार्थवादः। त्रिविधा अप्येतेऽर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमानाः प्रयोजनवदर्थपर्यवसायि विध्यपेक्षितं प्राशस्त्यं लक्षणावृत्त्या समर्प्य विधिवाक्येन सहैकवाक्यतां भजन्ते। त्रिविधानामेषां विधिस्तुतिपरत्वे समानेऽपि गुणवादानुवादयोर्बाधितविषयत्वात् ज्ञातज्ञापकत्वाच्च स्वार्थे प्रामाण्याभावः। प्रामाण्यं नाम अबाधिताज्ञातज्ञापकत्वमित्युक्तम्। भूतार्थवादस्य तु स्वार्थे प्रामाण्यं न वारयितुं शक्यते। स्वतःप्रामाण्यवादे तस्यौत्सर्गिकत्वात्॥

अथ कापिलसांख्यमतमुच्यते। अत्र पदार्थानां चतस्रो विधाः प्रतिपाद्यन्ते। कश्चिदर्थः प्रकृतिरेव कश्चिद्विकृतिरेव कश्चिदुभयरूपः कश्चिदनुभयरूप इति। तदुक्तं। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति। अत्र केवला प्रकृतिः प्रधानपदवाच्या मूलप्रकृतिः। नासावन्यस्य कस्यचिद्विकृतिः। प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात्॥ अथ पुरुषसान्निध्यवशाज्जडा अपि प्राकृता भावाश्चेतनवदवभासन्ते। प्रकृतिसान्निध्यवशाच्चासंगोऽपि पुरुषः कर्तेव सुखादिमानिव चावभासते। एवं च प्रकृतिपुरुषसंयोग एवाखिलं संसारप्रपंचं निर्वाहयति। भोक्तृत्वयोग्यता हि पुरुषस्य चैतन्यं भोग्यत्वयोग्यता हि प्रकृतेर्जडत्वम्। प्रोक्तयोग्यतावतोरनयोरंधपंगुन्यायेन संयोगः समभवत्। यथा कश्चिदंधः स्वयं जंघालोऽपि स्खलनं परिजिहीर्षुः कंचिच्चक्षुष्मन्तं पंगुमपि स्कंधेनोद्वहति। पंगुस्तु स्वयं चक्षुष्मानपि यथेष्टविहारमभीप्सुः कंचिज्जंघालमंधमपि समधितिष्ठति। तथैवाचेतना प्रकृतिः स्वप्रवृत्तिनिर्वाहाय चेतनमधिष्ठातारमुद्वहति। चेतनोऽपि पुरुषः स्वयमप्रसवधर्मा स्वभोग्यप्रसवित्रीं प्रकृतिमधितिष्ठति। ततश्च भोग्येन प्रधानेन संभिन्नः पुरुषो भोग्यधर्मभूतं सुखदुःखमोहजातं स्वात्मन्यभिमन्यमानः कदाचिदपि दुःखत्रयोपघातं

(12)



प्रार्थ्यते। तं चास्य प्रधानभूता प्रकृतिः सेधयति निष्पादयतीत्यर्थः। न चाज्ञानं साधयतीतिवत् प्रयोक्तुमुचितमिति वाच्यम्। दुःखत्रयोपघातस्य कैवल्यमुक्तिरूपत्वेन पारलौकिकतया सिध्यतेर् पारलौकिके इत्यादव विधायकसूत्रप्रवृत्तेः॥ ननु नित्यायाः प्रवृत्तिशीलायाश्च प्रकृतेरनुपरमात् सदैव सर्गः स्यादिति न कश्चिदपि दुःखत्रयान्मुच्येतेति चेन्नैवम्। प्रकृतेरुपरमस्यापि संभवात्। यथा हि नृत्यावलोकनोत्सुकान् रंगस्थान् पुरुषान् निजनृत्यकौशल्यं दर्शयित्वा तेषामौत्सुक्योपशमे सति नर्तकी नृत्यक्रियातो निवर्तते न पुनरनुत्सुकांस्तान् निजनृत्यं प्रदर्शयितुं प्रवर्तते तथा प्रकृतिरपि स्वसृष्टविषयभोगोत्सुकान् मर्त्यकं पुरुषान् भोजयितुं प्रवृत्तापि यं पुरुषं विगलितविषयवासनं मन्यते तं प्रति न पुनः प्रवर्तते॥

ननु भोक्तृत्वयोग्यता हि पुरुषस्य चैतन्यमित्युक्तं तथा सति चैतन्यधर्मा पुरुषः कथं विगलितभोग्यवासनो भवेदिति चेदुच्यते। न ह्युक्तलक्षणं चैतन्यं वासनां प्रसूते किन्तु क्लेशसलिलावसिक्तायां बुद्धिभूमौ निपतितानि कर्मबीजानि वासनांकुरान् प्रसुवते। यदा तु नाहं सुखादिमान् किन्तु त्रैगुण्यातीतो, प्राकृतत्वादिरिति प्रकृतिपुरुषविवेकज्ञानमुत्पद्यते (प्रकृतिपुरुषयोर्भेदे ज्ञानं यज्ज्ञानं साक्षात्कारस्तदेवात्र शास्त्रे प्रकृतिपुरुषान्यताख्यातिपदेन व्यवह्रियते। इदमेव चास्य शास्त्रस्य परमं प्रयोजनम्) तदा तु तत्त्वज्ञाननिदाघेनापीतसकलक्लेशसलिलायामूषरायां तस्यां दग्धानां कर्मबीजानां कुतः पुनर्वासनांकुरप्रसव इति॥ उत्पन्नतत्त्वसाक्षात्कारोऽपि पुरुषः प्रारब्धकर्मसंस्कारवशात् सदेह एव कंचित्कालं तिष्ठति। यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद् भ्रमदेव तिष्ठति। यथा च कालकलक्रमेण सति संस्कारोपशमे चक्रं परिभ्रमणं विनिर्मुक्तं सत् स्वभावे नाव तिष्ठते। एवं कृतप्रयोजनत्वादुपरतायां प्रकृतौ भोगेन प्रारब्धसंस्कारोपशमे सति विमुक्तदेहबंधनः पुरुषो निजेन कैवल्यस्वभावेन संपद्यते। तथा च श्रूयते। 'भोगेन त्वितरे क्षपयित्वाथ संपद्यते' इति॥ एवम्भूतस्यास्य मूलभूतं सूत्रग्रंथं अथ त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थ इत्यादि षडध्यायात्मकं भगवान् कपिलमुनिः प्रणिनाय। तत्र प्रथमेऽध्याये विषयाः निरूपिताः। द्वितीय-

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

चेध्मातमे प्रधानकार्याणि तृतीये विषयेभ्यो वैराग्यं चतुर्थे विरक्तानां पिंगलाकुररादीनामाख्यायिकाः। पंचमे परपक्षनिर्णयः। षष्ठे सर्वार्थसंक्षेप इत्येवमर्था निरूपिता इति दिक्। इति सांख्यमतम्॥

अथ वेदो नाम वेद्यंते ज्ञाप्यंते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या चतुर्वर्गसाधनभूतो ग्रंथविशेषः। करणे घञ् बाहुलकात्। स च किंलक्षण इति चेत् मंत्रब्राह्मणयोर्वेदनामधेयम्, इति आगमोक्तं तल्लक्षणं वेदितव्यम्। तत्र तावदृग्वेदस्य चरणव्यूहे मानमुक्तम्। ऋचां दश सहस्राणि ऋचां पंचशतानि च। ऋचामशीतिः पादश्च (१०५८०) तत्पारायणमुच्यते। इति। अस्य च पंच शाखाः संति। शाकला बाष्कला आश्वलायनाः शांखायना माण्डूकाश्चेति। तत्राद्यौ शौनकीये प्रातिशाख्ये। ऋचां समूहो ऋग्वेदस्तमभ्यस्य प्रयत्नतः। पठितः शाकलेनादौ चतुर्भिस्तदनंतरम्। शांखायनाश्वलायनौ चैव माण्डूको बाष्कलस्तथा। बहवृचा ऋषयः सर्वे पंचैते एकवेदिन इति। अत्र शाकलादिषु ऋषिशब्दो गौणो न तु मुख्यः आश्वलायनगृह्ये देवर्ष्याचार्यतर्पणविधिविधायके सूत्रे शाकलादीनामृषिष्वपरिगणनादाचार्येषु गणनाच्च। ऋग्वेदस्य सप्तदशाधिकमेकसहस्रं सूक्तानि षडधिके द्वे सहस्रे वर्गाः। चतुःषष्टिरध्यायाः। १० मंडलानि अष्टकाः ८। तत्र सूक्तलक्षणं बृहद्देवतायां (शौनककृतो ग्रंथः) संपूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते। तत्त्रिविधम्। ऋषिदेवताछन्दोभेदात्। मंडलद्रष्टार आश्वलायनगृह्यसूत्रे उक्ताः। शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो अत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्याः क्षुद्रसूक्ता महासूक्ता इति, मधुच्छंदःप्रभृतयोऽगस्त्यांता आद्यमंडले, ये सन्ति ऋषयस्ते वै सर्वे प्रोक्ताः शतर्चिनः। शतर्चिपदस्य निर्वचनं पूर्वाचार्यैः कृतं तद्यथा। ददर्शादौ मधुच्छन्दा अधिकं यदृचां शतम्। तत्साहचर्यादन्येऽपि विज्ञेयास्तु शतर्चिनः॥ अन्यच्छत्रिणैकेन यथा ते छत्रिणो भवन् इति। अधिकेऽपि शतोक्तिर्बाहुल्यात्। अंत्ये मंडले क्षुद्रसूक्तानां महासूक्तानां च द्रष्टार ऋषयोऽपि लक्षणया क्षुद्रसूक्ता महासूक्ता इति व्यपदिश्यंते। महासूक्तलक्षणं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

दशर्चेताभ्यो अधिकं महासूक्तं विदुर्बुधाः इति। एतेनैकर्चप्रभृतिदशर्चपर्यंतं क्षुद्रसूक्तमिति क्षुद्रसूक्तलक्षणमपि सूचितं भवति। मध्यमेषु द्वितीयादिनवमांतेषु मंडलेषु ये ऋषयस्ते माध्यमा व्यपदिश्यंते। तथाच प्रथमस्य शतर्चिनो द्वि॰ गृत्समदः तृ॰ विश्वामित्रः च॰ वामदेवः पं॰ अत्रिः ष॰ भरद्वाजः स॰ वसिष्ठः अ॰ प्रगाथा न॰ पावमान्या द॰ क्षुद्रसूक्ता महासूक्ताश्चेति सूत्रार्थः॥

अथैषामृषीणां चातुर्विध्यमुक्तं पूर्वाचार्यैः। ऋषीणामृषिपुत्राणामृषिकाणां स्वयंभुवाम्। तथा नामाभिजानीयाद्धयेषां मंत्रदृष्टयः॥१॥ यथा यतो हेतोरेषामृष्यादीनां मंत्रदृष्टयो वर्तते तथा ततो हेतोरेषां नाम ऋषिरित्येव सामान्यतो जानीयात्॥१॥ प्रवरैर्ये समाख्याता ऋषयस्त इतिश्रुतिः॥ तत्पुत्रपौत्रनप्तार ऋषिपुत्रा इति स्मृताः॥२॥ प्रवरैर्मंत्रदर्शिभिः पुत्रपौत्रादिभिर्ये समाख्याताः प्रसिद्धास्ते ऋषयः कथ्यन्त इति शेषः नप्ता प्रपौत्रः॥२॥ राजन्यवैश्या ऋषिकाः स्त्रियस्तास्तिर्यग्योनयः। देवा ऽ देव्याप्सरो नद्यो गंधर्वास्ते स्वयंभुवः॥३॥ इति। राजन्यवैश्याः अपि च ताः स्त्रियः गोधा घोषाप्रभृतयो ब्रह्मवादिन्य इति प्रसिद्धाः ऋषिका इत्युच्यंते। ऋषिका इति पुंसि स्त्रियां च तंत्रेण बहुवचनांतं प्रयुक्तम्। तिर्यग्योनयः पशुजातयः देवा अदेवा इत्यादयस्ते स्वयंभुव इति व्यपदिश्यंते॥३॥

एकशतमध्वर्यु शाखा इति महाभाष्ये पतंजलिराह। यजुर्वेदस्य षडशीति भेदा भवंतीति चरणव्यूहः। परं तेषु शाखाभेदेषु कतिचिदुच्छिन्नाः संतो नामतोपि न ज्ञायंते। येषां हि नामानि ग्रंथेषूपलभ्यंते तान् भेदान्वदामः। चरका आह्वरकाः कठाः प्राच्यकठाः कापिष्ठलकठाश्चारायणीया वारतंतवीयाः श्वेताः श्वेततराः औपमन्यवाः पातांडिनेया मैत्रायणीयाश्चेति। मैत्रायणीयानामपि षड्भेदा भवंति। मानवा वाराहा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

दुंदुमाश्छागलेया हारिद्रवीयाः श्यामायनीयाश्चेति। तथा चरक
विशेषाणां तैत्तिरीयकाणां द्वौ भेदौ भवतः। औखीयाः खांडि
कीयाश्चेति। खांडिकीया अपि पंचधा भिन्नाः। आपस्तंबी बौ
धायनी सत्याषाढी हिरण्यकेशी शाट्यायनीचेति। वारतंतवी-
या औखीयाः खांडिकीयास्तैत्तिरीया इत्यत्र तित्तिरिवरतंतुखं-
डिकोखाच्छण् इति पाणिनीयसूत्रेण छण् प्रत्ययः। आपस्तं
बीत्यादि पंचसु कलापिवैशंपायनांतेवासिभ्यश्चेति सूत्रेण
णिनिः। एषां सर्वेषां स्वाध्यायमानं चरणव्यूहे प्रोक्तम्। अष्टाद
श सहस्राणि मंत्रब्राह्मणयोः सह। यजूंषि यत्र पठ्यंते स य
जुर्वेद उच्यते॥ इति। सर्व एवैते भेदाः कृष्णयजुःशब्देन व्यव
ह्रियंते। वक्ष्यमाणाः काण्वमाध्यंदिनादयस्तु शुक्लयजुःशब्देन
तत्कारणं संप्रदायविदो विदुरित्यलम्॥ दर्शपौर्णमास प्रभृति
सर्वयज्ञरूपयुक्तानां यजुर्मंत्राणां ब्राह्मणासंकीर्णानां यथायोग्य
क्रमेण विन्यासेन याज्ञिकानां व्यामोहाजननात्। प्राचीनयजुर्वेद
स्य तु ब्राह्मणसंकीर्णत्वात् तत्र यथास्थानं मंत्राणामनुक्रमेण
पाठाभावाच्च तत्र यज्ञकर्मानुष्ठानमार्गस्य दुर्ज्ञेयत्वात् कृष्णत्वमिति॥

शुक्लयजुर्वेदस्य पंचदश भेदाः संति काण्वा माध्यंदिना जा
बाला बुधेयाः शाकेयास्तापनीयाः कपोलाः पौण्ड्रवत्सा आव
टिकाः परमावटिकाः पाराशरा वैनेया वैधेया औधेया गाल
वाश्चेति। सर्व एते वाजसनेयिन इति व्यपदिश्यंते। एतद्वेद-
स्य मानमुक्तं चरणव्यूहे। द्वे सहस्रे शतन्यूने मंत्रा वाजसनेयके।
तावन्मात्रेन संख्यातं वालखिल्यं सशुक्रियम्। ब्राह्मणं तु स
माख्यातं प्रोक्तमानाच्चतुर्गुणम्। इति। वाजसनेयिनां ब्राह्म
णं शतपथसंज्ञकम्। तच्चार्वाचीनमिति भट्टोजीदीक्षितमते
न। सिद्धांतकौमुद्यां 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' इति सू-
त्रे भाल्लविनः शाट्यायनिन इत्युदाहृत्य पुराणेति किम्। याज्ञ
वल्क्यानि ब्राह्मणानीति प्रत्युदाहृतम्। तत्स्वारस्याद्यद्यपि
याज्ञवल्क्यो न पुराणो मुनिरिति प्रतीयते, तथापि याज्ञवल्क्या

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

दिभ्यः प्रतिषेधस्तुल्यकालत्वादिति तद्विषयतावचनेति वचनमेतत्
सूत्रभाष्ये पतंजलिनोपन्यस्तम्। तत् स्वारस्येन याज्ञवल्क्यः पुराण एवेति
लभ्यते। अन्यथा वचनारंभो व्यर्थः स्यात्। पुराणपदेनैव तद्व्यावृत्तेः
सिद्धत्वात्। याज्ञवल्क्यस्य वैशंपायनांतेवासित्वेन शाट्यायना-
दितुल्यकालभवत्वाच्च। स्पष्टं चेदमन्ये च सूत्रे शब्देंदुशेखरे इतिदिक्॥
अथ सामवेदस्य सहस्रं शाखा आसन् तत्रानध्याये ष्वधी-
यानाबहवः शाखाध्यायिन इन्द्रेण शतपर्वणा निहतास्ततः
प्रभृति बह्व्यः शाखा उच्छिन्नाः। कतिचिदेवावशिष्टाः प्रचरंति
। यथा राणायनीयाः शाट्यमुग्राः कापोला महाकापोला लांग
लिकाः शार्दूलाः कौथुमाश्चेति। तत्र कौथुमानां षड्भेदाः संति।
आसुरायणा वातायना प्रांजलयो वैनधृताः प्राचीनयोग्या नै
गेयाश्चेति। एतत्सर्वमुक्तं चरणव्यूहे। अष्टौ साम सहस्राणि
सामानि च चतुर्दश। ऊहान्यानि सरहस्यानीत्येतत् सामगणः स्मृ
त इति॥ अथर्वणवेदस्य नव भेदा भवंति। पैप्पलादाः
शौनकीया दामोदास्तोतायना जाजलाब्रह्मपलाशाः कुनखी
देवदर्शी चारणविद्याश्चेति। एतत्सर्वमुक्तं चरणव्यूहे। द्वा
दशानि सहस्राणि मंत्राणां त्रिशतानि च। गोपथं ब्राह्मणं वे
दे ऽथर्वणे शत पाठकम्। (शत प्रपाठकमित्यर्थः) इति। इदं मत्र
संप्रधार्यम्। मंत्रब्राह्मणयोर्वेदत्वाविशेषेपि अत्र लोके
प्रागवतरणं मंत्रभागस्य ● ततः कालांतरेण ब्राह्मणभाग-
स्येति। सर्वत्र ब्राह्मणग्रंथेषु तत्तद्वेदमंत्राणां यज्ञकर्मसु य
थायथमुपयोगस्य बहुधा प्रदर्शितत्वात्। मंत्रभागेष्वपि
ऋक्संहितायाः प्रथममवतरणं ततो यजुःसंहितादेः। य-
जुर्वेदे बहूनामृङ्मंत्राणामनुवाददर्शनात्। ऋङ्मंत्रानव
लंब्यैव च सर्वेषां साम्नां गीयमानत्वात्। एवं वक्ष्यमाणल-
क्षणानि कल्पसूत्राणि ब्राह्मणग्रंथोत्तरकालानि। तेषां ब्रा
ह्मणग्रंथबोधितयज्ञादिकर्मकांडप्रपंचभूतत्वादिति बोध्यम्॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अथोच्यंते मतानीह दर्शनानां समासतः। नास्तिकास्तिकगीतत्वात् द्विधातानि प्रचक्षते॥१॥ नास्ति वेदोदितो लोक इतियेषां मतिः स्थिरा॥ नास्तिकास्ते तथास्तीति मतिर्येषां त आस्तिकाः॥२॥ अवैदिकप्रमाणानां सिद्धान्तानां प्रदर्शकाः। चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः॥३॥ वेदप्रमाणकानीह प्रोचुर्यैर्दर्शनानि षट्॥ न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः॥४॥

तत्र चार्वाक, माध्यमिक, योगाचार, सौत्रांतिक वैभाषिकार्हत भेदेन षड्विधा नास्तिकाः। यतः सर्वेप्येते वेदबाह्यानि दर्शनानि दर्शयामासुः॥ तत्र तावद्बृहस्पति मतानुसारिणो नास्तिकशिरोमणेश्चार्वाकस्य मतं यथा॥ पृथिव्यादीनि चत्वारि तत्वानि तेभ्य एव देहाकारेण परिणतेभ्यो मदशक्तिवच्चैतन्य मुपजायते, तेषु विनष्टेषु स्वयं विनश्यति। तदिह ज्ञानघनो जीवः एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति। नहि प्रेत्य संज्ञास्ति। तस्माच्चैतन्य विशिष्टदेह एवात्मा। देहातिरिक्तात्मनि प्रमाणाभावात्। प्रत्यक्षैक प्रमाणवादितया अनुमानादेरनंगीकारेण प्रमाणत्वाभावात्। एवं चांगनालिंगनादि जनितं सुखमेव पुरुषार्थः। न चास्य दुःखसंभिन्नत्वात् (दुःखेन संभिन्नं विमिश्रं तथाविधत्वात्) पुरुषार्थत्वमेव नास्तीति मंतव्यम्। अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोग्यत्वात्। तद्यथा धान्यार्थी क्षेत्रात् सपलालानि धान्यान्याहरति, ततः स यावत्तेभ्य आदेयं तावदादाय निवर्तते। यथा वा मत्स्यार्थी सशल्यान् सकंटकान् मत्स्यानुपादत्ते। स यावदादेयं तावदादाय निवर्तते। तस्माद्दुःखभयेन नानुकूलवेदनीयं सुखं त्यक्तुमुचितम्। नहि मृगाः संतीति शालयो नोप्यंते। न हि वा भिक्षुकाः संतीति स्थाल्यो नाधिश्रियंते। यदि कश्चिद्भीरुर्दृष्टं सुखं परित्यजेत् तर्हि स पशुवन्मूर्खो भवेत्॥ ननु यदि पारलौकिकं दुःखासंभिन्नं (स्वल्पेनापि दुःखेन असंमिश्रम्) सुखं नास्त्येव तर्हि विद्यावृद्धा बहुवित्त व्यय शरीरायास साध्येऽग्निहोत्रादौ कथं प्रवर्तेन इति

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

चेन्न। वेदत्रयस्य धूर्तप्रलापमात्रत्वेनाग्निहोत्रादेर्जीविका
मात्रप्रयोजनकत्वात्। तस्मात् कंटकादिजन्यं दुःखमेव नरक-
म्। लोकसिद्धो राजा परमेश्वरः। देहोच्छेदो मोक्षः। देहात्म
वादे एव च कृशोहं कृष्णोहमिति सामानाधिकरण्योपपत्तिः।
ममेदं शरीरमिति व्यवहारस्तु राहोः शिर इतिवदौपचारिकः॥

ननु प्रत्यक्षातिरिक्तस्य प्रमाणस्यानंगीकारेऽनुमानादिसि
द्धस्यादृष्टस्याप्यनंगीकारापत्तौ जगद्वैचित्र्यं कथमुपपद्यतामि
ति चेत् स्वभावादेव तदुपपत्तेः। तदुक्तं "अग्निरुष्णो जलं शीतं शी
तस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थि
तिरिति॥ इति चार्वाकमतम्॥

अथ बौद्धमतानि प्रदर्श्यंते। माध्यमिकयोगाचारसौ
त्रांतिकवैभाषिकसंज्ञाभिश्चतुर्विधा बौद्धाः। पूर्वोक्तं चार्वाकम
तमसहमानाः प्रत्यक्षवदनुमानमपि प्रमाणत्वेनाभ्युपगच्छंति॥
तथाहि। यद्यनुमानं प्रमाणं न भवेत् तर्हि धूमोपलंभानंतरं धू
मध्वजे वह्नौ प्रेक्षावतां प्रवृत्तिरनुपपद्यमाना स्यात्। नद्यास्ती
रे फलानि संतीति वाक्यश्रवणानंतरं फलार्थिनां नदीतीरे प्र
वृत्तिश्च न स्यात्। किंच सकलव्यवहारनिदानस्य सद्विचार-
स्यानुमानैकजीव्यत्वं सर्वानुभवसिद्धम्। न हि कश्चिदपि व
स्तुदर्शनमात्रेण तत्र प्रवर्तते ततो वा निवर्तते। किंतु इष्टसाध
नत्वानिष्टसाधनत्वनिश्चयोत्तरमेव क्षीरादिपाने विषादिप
रिवर्जने च यतते। किंच त्वमिदं विषं भक्षयेथा इति केनचिदभि
नियुक्तो भवान् यदि ब्रूयात् विषभक्षणान्मनुष्या म्रियंते
मनुष्यश्चाहमतो न भक्षयिष्ये इति। तर्हि मनुष्यजातीयस्य
ममेदं वस्तु मारकं विषजातीयत्वादित्याकारकं स्वीकृतमेव स्वभा
वानुमानमकामेनापि भवता। किंच न स्वर्गो नापवर्गश्चैवने
वात्मा पारलौकिकः इति भवदुक्तः प्रतिषेधः कथं मंतव्यः।

स्वर्गादीनामनुपलंभादिति चेदनुपलब्ध्या स्वर्गादीन् प्रतिषेधयता भवताऽनुपलब्धिलिंगकमनुमानं स्वीकृतमेवेत्येवं जितमत्र सूरिभिः॥ माध्यमिकादयश्चत्वारोपि बौद्धाः सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति चतुर्विधया भावनया परमपुरुषार्थावाप्तिं कथयंति। किंच माध्यमिकाः सर्वशून्यत्ववादं योगाचारा बाह्यार्थशून्यत्ववादं सौत्रांतिका बाह्यार्थानुमेयत्ववादं वैभाषिकास्तु ज्ञानान्वितोभयार्थसत्ववाद मातिष्ठंते॥

माध्यमिकादीनां चतुर्णामेषां बोधयिता यद्यपि भगवान् बुद्ध एक एव तथापि बौद्ध्यानां चातुर्विध्यं बोद्धृबुद्धिभेदात् समभवत्। यथा गतोऽस्तमर्क इत्युक्ते चोरजारानूचानादयः स्वस्वभावानुसारेण परस्वहरण परांगनाभिसरण धर्माचरण समयानवगच्छंति॥ बौद्धानां सुगतो देवो विश्वंच क्षणभंगुरम्। आर्यसत्वाख्यया तत्वचतुष्टयमिदं क्रमात्। दुःखमायतनं चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामियम्॥ दुःखं संसारिणः स्कंधास्ते च पंच प्रकीर्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च। पंचेंद्रियाणि शब्दाद्या विषयाः पंच मानसम्॥

१ बुद्धिः धर्मायतनमेतानि द्वादशायतनानि हि॥२॥ रागादीनां गणो यो सौ समुदेति नृणां हृदि। आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः॥३॥ रागादिगणे हंकारो मानपदाभिलाप्य आत्मस्वरूपः अन्ये आत्मीयस्वभावाः॥३॥ क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा। स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते॥४ प्रत्यक्षमनुमानं च प्रमाणद्वितयं मतम्। चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः॥५॥ अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते। सौत्रांतिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः॥५॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai Joint Project

बाह्यो र्थो प्रत्यक्षग्राह्यो न मतः किंत्वनुमेय एवेति ॥५॥ आकारस
हिता बुद्धिर्योगाचारेण संमता । केवलां संविदं स्वस्थां मन्यंते
मध्यमाः पुनः ॥६॥ रागादिज्ञानसंतानवासनाच्छेदसंभवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता ॥७॥ कृत्तिः कमंड
लु मौण्ड्यं चीरं पूर्वाण्हभोजनम् । संघो रक्तांबरत्वं च शिश्रिये
बौद्धभिक्षुभिः ॥८॥ इति । पौराणिकास्त्वेवं मन्यंते । तिष्ये धर्म
नृपस्य राज्यसमयात् काले व्यतीते त्वके श्री विष्णोरवतार एष
नवमो बुद्धाभिधानो ऽभवत् । नीचानामसतां विमोहजननं
श्रौतध्वनिं दाम्भिषात् भूताहिंसनमुख्यधर्ममतनोत् सर्वश
एव प्रभुः ॥ इति । अथ जैनमतम् ॥ आस्रवलक्षणं भव
प्रवाहद्वारं संवृणोतीति संवरः । स च गुप्तिसमित्यादिरूपो जीवे
प्रविशत् कर्मजातं प्रतिषेधति । संसारकारणात्मनो गोपनं गु-
प्तिः । सा च अशुभकर्मभ्यः कायवाङ्मनो निग्रहरूपा । समिति
स्तु प्राणिपीडापरिहारेण सम्यगयनेन गमनं सम्यक्प्रवर्तनम् ॥ अर्जि
अर्जितस्य कर्मणः केशोल्लुंचनादितपःप्रभृतिभिर्निर्जरणं निर्जरासंज्ञ
कं तत्वम् । सा च निर्जरा द्विविधेति प्रोच्यते यथाहुस्तत्वविदः । संसा
रबीजभूतानां कर्मणां जरणादिह । निर्जरा संस्मृता द्वेधा सकामा
कामवर्जिता । स्मृता सकामा यमिनामकामा त्वन्यदेहिनामिति ।
तत्र यमिनो मुमुक्षवः अन्यदेहिनो जीवन्मुक्ताः ॥ निःशेषकर्मबं
धोच्छेदाद संगत्वेनावस्थानं मोक्षः । बंधमोक्षयोः कारणमु
क्तं तत्ववेदिभिः । आस्रवो बंधहेतुः स्यात् संवरो मोक्षकारणं
। इतीयमार्हती मुष्टिरन्यदस्याः प्रपंचनम् ॥ इति । तथार्हत्प्रवचन
संग्रहपरे आगमसारे प्युक्तं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग
इति । विवृतं चैतद्योगदेवेन । येन रूपेण जीवाद्यर्थो व्यवस्थित
स्तेन रूपेणार्हता प्रतिपादिते र्थे विपरीताभिनिवेशराहित्यरूपं श्र
द्धानं सम्यग्दर्शनम् । येन स्वभावेन जीवादयो व्यवस्थितास्तेनैव स्वभा
वेन संशयसंमोहरहितो वबोधः सम्यग्ज्ञानम् । तद्विश्रद्धावतो
जीवस्य गुरूपदिष्टश्रवणमननाद्यभ्यासपाटवेन ज्ञानावरकाणां

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

पूर्वोपपादित मिथ्यादर्शनाविरति प्रमादादीनामुपशमे सति स्वयमेव
समुदेति। संसरणकर्मोच्छेदायोद्यतस्य श्रद्धानस्य ज्ञानवतो जी
वस्य पापकर्मभ्यो निवृत्तिः सम्यक्चारित्रम्। एतानि सम्यग्ज्ञाना
दीनि समुदितान्येव मोक्षकारणम्। न तु प्रत्येकम्। एतत् त्रयं चार्ह
ते रत्नत्रयपदेन व्यवह्रियते इति दिक्। इति जैनमतदर्शनम्॥

अथात्र केचिद् बौद्धः शौधकास्त्विथं संप्रचक्षते। आदौ लो
कायतमत प्रकाशन महापटुः। वेदवद्धं महामार्गं खंडितुं यत्न
मातनोत्॥१॥ ततो बौद्धा मुक्तकच्छास्ततो जैना दिगंबराः। श्वेतां
1 जैनाः बराश्च्यत इति नास्तिका बहुरूपिणः॥२॥ पुरा काले बुद्धनाम्ना पुरु
षेण प्रकाशितं। बौद्धं मतं मयैनं हि द्विजाः पाखंडिनो जगुः॥३॥
निर्वासयामासुरमुं वर्णाः सर्वे स्वदेशतः। ततः स सिंहलद्वीपं ति
बेटं चीनभूमिकां। ब्रह्मदेशं च गत्वाथ बौद्धधर्मं समातनोत्॥४
ततः काले तात्रखंडे भारते विक्रमात पुरा। खमुन्यंभोधिविमि
ते (४७०) वर्षे धीराढ्यो नरः। प्राचारज्जैनधर्मं बौद्धधर्मं समप्रभ
मू। एतस्मिन्नेव समये नानाप्रारखंडरूपिणः। कापालिकाश्च नाथा
श्च चार्वाकव्याख्याश्च जज्ञिरे इति दिक्॥

शंकराचार्य प्रादुर्भावस्तु विक्रमार्कसमयादतीते ८४५ केर
लदेशे कालपी ग्रामे। शिवगुरुशर्मणो भार्यायां विशिष्टायां समभ
वत्। तथा च संप्रदायविदुक्तं हि। निधिनागेभवन्ह्यब्दे विभवे
मासि माधवे, शुक्ले तिथौ दशम्यां तु शंकरार्योदयः स्मृतः। नि॰
३८८९ नवाशीत्युत्तराष्ट्शत्यधिके त्रिसहस्रीमिते वर्षे इत्यर्थः
कलियुगस्येति शेषः। विक्रमार्कसमयात् ११५० संवत्सरे गुर्जरधरा
धिपो जयसिंहनामा बभूव। तदानीं श्रीपत्तने निवसतो देवसूरि
नामक जैनाचार्यस्य शिष्यो माणिक्यनामा कश्चित् पंडित आ
सीदिति। कुमारिलभट्टाचार्येण सह मया गच्छते श्रे शंकराचार्याणां
समागम आसीत्। इति शं॰ दि॰। अयं च शिवावतार इति आनंदगि
रिकृते माधवाचार्यकृते च दि॰ ग्रंथे उक्तं। तथा कूर्मपुराणे त्रिंशत्त
मे ध्याये युगवंशानुकीर्तने। कलौ रुद्रो महादेवो लोकानामी
श्वरः परः। करिष्यत्यवतारं स्वं शंकरो नीललोहितः॥१॥ श्रौतस्मा-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

र्त प्रतिष्ठार्थे भक्तानां हितकाम्यया। उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्र
ह्म संमितं ॥२॥ सर्ववेदांतसारं च धर्मान्वेदनिदर्शनान्। इति॥

अथ वैष्णवमतानि। तत्र नारदपंचरात्राद्यागमोक्तप्रकारे
णवैष्णवमंत्रदीक्षासंस्कृता वैष्णवाः॥ तथा च वैष्णवलक्षणमुक्तं
निर्णयसिंधावेकादशीनिर्णयप्रकरणे स्कंदपुराणे। परमापदमापन्नो ह
र्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी। विष्णव
र्पिताखिलाचारः स हि वैष्णव उच्यते इति। विष्णुस्वामिसंमतसंप्रदा
यस्तु मध्वयुत्तरमाचिरेणैव विलसः। ततश्चेदं मतं भूयसा कालेन श्री
वल्लभाचार्यैः समुद्धृत्य पुष्टिमार्गापरनामधेयो। पूर्वः संप्रदायः प्रवर्तयां
चक्रे। विष्णुस्वामिन इतिहासः। दिल्लीनगरे राज्यपदाधिरूढस्य कस्य
चिन्महाराजस्य सामंतो द्रविडदेशीयः कश्चन भूपतिरासीत्। तस्य
प्रधानामात्याद् विष्णुस्वामी समजायत। स च द्वैतसिद्धांतं खं
डयित्वा साकारसिद्धिलक्षणं वैष्णवसंप्रदायं प्रवर्तयामास। ततस्त्रि
दंडी संन्यासी भूत्वा सिद्धिं गत इति। अयं शंकराचार्यादर्वाचीन इति भाति॥

अथ रामानुजस्येतिहासः। अस्ति कश्चिद् द्रविडदेशे भूतपुरीनाम
को ग्रामो यः संप्रति श्रेमधुरेत्यभिधीयते। तत्र निवसतः केशवाभि
धविप्रस्य भार्यायां मतिनामिका यां रामानुजः समजनि। ततः शं
करमतानुयायिना यादवनाम्ना मातुलेनाध्यापितोयं रामानुजो
ऽभिनववैष्णवसंप्रदायप्रवर्तको बभूव। अयमाचार्यो विष्णुस्वामि
शिष्यसंताने गृहीतजन्मनो बिल्वमंगलस्य पश्चाज्जन्म ध्वाचार्यस्य
च पुरस्तात् समभवदिति॥ अस्य मते चिदचिदीश्वरभेदेन भोक्तृ
भोग्यनियामकभेदेन वा व्यवस्थितास्त्रयः पदार्थाः संति। तदुक्तं
ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः। ईश्वरश्चिदित इत्युक्तो [illegible]
को जीवो दृश्यमचित् पुनः। इति। तत्र चिच्छब्दवाच्या जीवात्मानः
परमात्मनः सकाशाद्भिन्ना नित्या अणुपरिमाणाश्च तथा च श्रुतयः
द्वा सुपर्णा॰ न जायते म्रियते॰ बालाग्रशतभागस्य शतधा कल्पि
तस्य च भागो जीव इति प्रोक्तः स चानंत्याय कल्पते इति। अराग्र
मात्रः पुरुषो ऽणुरात्मा चेतसा वेदितव्य इति च। उतचिच्छब्दवाच्यं दृश्यं ज
डं जगत् त्रिविधम्। भोग्यभोगोपकरणभोगायतनभेदात्। तस्य जगतः
कर्तोपादानं चेश्वरः पुरुषोत्तमो वासुदेवादिपदवेदनीयः। इति रा-
मानुजमतम्॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अथात्र मध्वाचार्यस्य मतमुच्यते। आनन्दतीर्थाभिधः पूर्णप्रज्ञापरनामधेयो मध्वाचार्यः संप्रदायांतरं प्रवर्तयांचकार। तन्मते जीवाणुत्वदासत्ववेदापौरुषेयत्वपंचरात्रोपजीव्यत्वप्रपंचभेदसत्यत्वादि यद्यपि रामानुजमततुल्यमेव तथापि रामानुजकल्पितस्तत्वविभागो न युक्तः परस्परविरुद्धत्वादिति स्थापयित्वा स्वतंत्रास्वतंत्रभेदेन तत्वद्वैविध्यमेव स्थापितम्। यथोक्तं तत्वविवेके। स्वतंत्रमस्वतंत्रं च द्विविधं तत्वमुच्यते (मिष्यते) स्वतंत्रो भगवान् विष्णुर्निर्दोषोऽशेषसद्गुण इति। ननु सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मैव तत्वमिति प्रतिपादकेषु वेदांतेषु जाग्रत्सु कथमशेषसद्गुणत्वं तस्य कथ्यत इति चेन्मैवम्। भेदप्रमाणविरोधेन तेषां वेदांतवाक्यानां तत्प्रामाण्यानुपपत्तेः। प्रत्यक्षं तावदिदमस्माद्भिन्नमिति नीलपीतादिभेदमध्यक्षयति। अत एव गवार्थिनो न गवयदर्शनात् प्रवर्तते न च गोशब्दं स्मरंति। अनुमानेनापि भेदोवसीयते। परमेश्वरो जीवाद्भिन्नस्तं प्रति सेव्यत्वात्। यो यं प्रति सेव्यः स तस्माद्भिन्नो यथा भृत्याद्राजेति। किंच सुखं मे भूयान्नमनागपि दुःखमिति पुरुषार्थमर्थयमानाः पुरुषाः स्वपतिपदं कामयमानाः सन्तो न सत्कारभाजो भवंति किंतु सर्वानर्थभाजनम्। यस्तु स्वस्य हीनत्वं स्वामिनस्तु गुणोत्कर्षं वर्णयति तस्मै स्तावकाय प्रीतः स्तुत्याभीष्टं प्रयच्छति। तदाह। घातयंति हि राजानो राजाहमिति वादिनः। ददत्यखिलमिष्टं च स्वगुणोत्कर्षवादिनामिति। एवं च परमेश्वराभेदतृष्णया विष्णोर्गुणोत्कर्षस्य मृगतृष्णिकायमानत्वाभिधानं विपुलकदलीलाभेच्छया जिह्वाच्छेदनमनुहरति। एतादृशविष्णुद्वेषिणामंधतमसप्रवेशः प्रसज्यत इति वैष्णवमतम्। इति मध्वाचार्यस्य मतम्॥

अथ माहेश्वरमतम्। अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोपि पिंडस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पारदपदवाच्यं रसमेव संगिरंते। तथा चोक्तं तैः। संसारस्य परं पारं दत्ते सौ पारदः स्मृत इति। रसार्णवेप्युक्तं षड्दर्शनेपि मुक्तिर्या दर्शिता पिंडपात

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

ने। करामलकवत् सा हि प्रत्यक्षा नोपलभ्यते॥ तस्मात्तं रक्षयेत्पिं
डं रसैश्चैव रसायनैरिति। ननु विनश्वरतया दृश्यमानस्य देहस्य कथं
नित्यत्वमवसीयत इति चेन्मैवं मंस्थाः। षाट्कौशिकस्य शरीरस्या
नित्यत्वेऽपि रसाभ्रकपदाभिलप्यमानहरगौरीसृष्टिजातस्य
तस्य नित्यत्वोपपत्तेः। तथा चोक्तं रसहृदये। ये चात्यक्तशरीरा हर
गौरीसृष्टिजां तनुं प्राप्ताः। वन्द्यास्ते रससिद्धा मंत्रगणाः किंकरा
येषामिति। तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमं दि
व्यं तनुर्विधेया। तत्रोपायश्चोक्तो गौरीं प्रति शिवेन। अभ्रकस्त
व बीजं तु मम बीजं तु पारदः॥ अनयोर्मेलनं देवि मृत्युदारिद्र्य
नाशनमिति। अल्पमिदमुच्यते। आयतनं विद्यानां मूलं धर्मार्थकाम
मोक्षाणाम्। श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकम्॥
एकोऽसौ रसराजः शरीरमजरामरं कुरुते इति। रसमाहात्म्य
मुक्तं रसार्णवे। दर्शनात् स्पर्शनात्तस्य भक्षणात् स्मरणाद
पि। पूजनाद्रसदानाच्च दृश्यते षड्विधं फलमिति। न चेदम
दृष्टचरमिति मंतव्यम्। विष्णुस्वामिमतानुसारिभिर्नृपंचास्य
शरीरस्य नित्यत्वोपपादनात्। अतोऽस्मादृक् देहनित्यत्वम
त्यंतादृष्टं न भवतीत्यलं प्रपंचेन। इति रसेश्वरमतदर्शनम्॥

---

पुरा किलात्र भारते वर्षे वेदशास्त्रादिसकलसंस्कृतवि
द्यापारावारपारीणा धरणीगीर्वाणा विद्वांसो भूयांसः संबभू
वुः। अथ कालवशादापतितेन वेदादिविद्यापठनपाठनसंप्रदा
यस्यातिकृशत्वेन सलिलसेकादिसहकारिकारणविरहेणो
द्यानभूमय इव गीर्वाणविद्या जीर्णतामावहन्ति। न चैतावता
अर्वाचीनाः कुमारा अकृतबुद्धयः संतीति विवक्षितम्। यतो
निजगुणसद्गुणगणानुरंजितनिखिलभूमंडलया निजप्रजाहि
तनिरतया श्रीमत्या महाराज्ञ्या स्वराष्ट्रे सर्वत्र ग्रामनगरादिषु
स्थापितासु पाठशालासु संस्कृतादिभाषाध्ययनं संपद्यते

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com